कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

॥अथ षष्ठ काण्डे चतुर्थः प्रश्नः॥

हरिः ओम्॥ यज्ञेन वै प्रजापतिः प्रजा असृजत ता उपयड्भिरेवाऽसृजत यदुपयज उपयजति प्रजा एव तद्यजमानः सृजते जघनार्धादव द्यति जघनार्धाद्धि प्रजाः प्रजायन्ते स्थविमतोऽव द्यति स्थविमतो हि प्रजाः प्रजायन्तेऽसम्भिन्दन्नव द्यति प्राणानामसम्भेदाय न पर्यावर्तयति यत्पर्यावर्तयेदुदावर्तः प्रजा ग्राहुकः स्याथ्समुद्रं गच्छ स्वाहेत्याह रेत [१] एव तद्दधात्यन्तरिक्षं गच्छ स्वाहेत्याहाऽन्तरिक्षेणैवाऽस्मै प्रजाः प्र जनयत्यन्तरिक्षग्ग् ह्यनु प्रजाः प्रजायन्ते देवग्ं सवितारं गच्छ स्वाहेत्याह सवितृप्रसूत एवाऽस्मै प्रजाः प्र जनयत्यहोरात्रे गच्छ स्वाहेत्याहाऽहोरात्राभ्यामेवाऽस्मै प्रजाः प्र जनयत्यहोरात्रे ह्यनु प्रजाः प्रजायन्ते मित्रावरुणौ गच्छ स्वाहे- [२] त्याह प्रजास्वेव प्रजातासु प्राणापानौ दधाति सोमं गच्छ स्वाहेत्याह सौम्या हि देवतया प्रजा यज्ञं गच्छ स्वाहेत्याह प्रजा एव यज्ञियाः करोति छन्दाग्ंसि गच्छ स्वाहेत्याह पशवो वै छन्दाग्ंसि पशूनेवाव रुन्धे द्यावापृथिवी गच्छ स्वाहेत्याह प्रजा एव प्रजाता द्यावापृथिवीभ्यामुभयतः परि गृह्णाति नभो [३] दिव्यङ्गच्छ स्वाहेत्याह प्रजाभ्य एव प्रजाताभ्यो वृष्टिं नि यच्छत्यग्निं वैश्वानरं गच्छ स्वाहेत्याह प्रजा एव प्रजाता अस्यां प्रति ष्ठापयति प्राणानां वा एषोऽव द्यति योऽवद्यति गुदस्य मनो मे हार्दि यच्छेत्याह प्राणानेव यथास्थानमुप ह्वयते पशोर्वा आलब्धस्य हृदयग्ं शुगृच्छति सा हृदयशूल- [४]

मभि समेति यत्पृथिव्याग्ं हृदयशूलमुद्वासयेत्पृथिवीग्ं शुचाऽर्पयेद्यदप्स्वपः शुचाऽर्पयेच्छुष्कस्य चाऽऽर्द्रस्य च संधावुद्वासयत्युभयस्य शान्त्यै यं द्विष्यात्तं ध्यायेच्छुचैवैनमर्पयति॥[४]

*रेतो मित्रावरुणौ गच्छ स्वाहा नभो हृदयशूलन्द्वात्रिग्ंशच्च॥**6.4.1**॥*

देवा वै यज्ञमाग्नीध्रे व्यभजन्त ततो यदत्यशिष्यत तदब्रुवन्वसतु नु न इदमिति तद्वसतीवरीणां वसतीवरित्वं तस्मिन्प्रातर्न समशक्नुवन्तदप्सु प्राऽवेशयन्ता वसतीवरीरभवन्वसतीवरीर्गृह्णाति यज्ञो वै वसतीवरीर्यज्ञमेवाऽऽरभ्य गृहीत्वोप वसति यस्याऽगृहीता अभि निम्रोचेदनारब्धोऽस्य यज्ञस्स्या [६] द्यज्ञं वि च्छिन्द्याज्ज्योतिष्मा वा गीयाद्धिरण्यं वाऽवधाय सशुक्राणामेव गृह्णाति यो वा ब्राह्मणो बहुयाजी तस्य कुम्भ्यानां गृह्णीयात्स हि गृहीतवसतीवरीको वसतीवरीर्गृह्णाति पशवो वै वसतीवरीः पशूनेवाऽऽरभ्य गृहीत्वोप वसति यदन्वीपं तिष्ठन्गृह्णीयान्निर्मार्गुका अस्मात्पशवः स्युः प्रतीपं तिष्ठन्गृह्णाति प्रतिरुध्यैवाऽस्मै पशून्गृह्णातीन्द्रो [७] वृत्रमहन्थ्सोऽ १ पोऽ २ ऽभ्यम्रियत तासा यन्मेध्यं यज्ञियग्ं सदेवमासीत्तदत्यमुच्यत ता वहन्तीरभवन्वहन्तीनां गृह्णाति या एव मेध्या यज्ञियाः सदेवा आपस्तासामेव गृह्णाति नाऽन्तमा वहन्तीरतीयाद्यदन्तमा वहन्तीरतीयाद्यज्ञमति मन्येत न स्थावराणां गृह्णीयाद्वरुणगृहीता वै स्थावरा यथ्स्थावराणां गृह्णीया- [८] द्वरुणेनाऽस्य यज्ञं ग्राहयेद्यद्वै दिवा भवत्यपो रात्रिः प्र विशति तस्मात्ताम्रा आपो दिवा ददृश्रे यन्नक्तम्भवत्यपोऽहः प्र विशति तस्माच्चन्द्रा आपो नक्तं ददृश्रे छायायै चाऽऽतपतश्च संधौ गृह्णात्यहोरात्रयोरेवाऽस्मै वर्णं गृह्णाति हविष्मतीरिमा आप इत्याह हविष्कृतानामेव गृह्णाति हविष्माग्ं अस्तु

[९] सूर्य इत्याह सशुक्राणामेव गृह्णात्यनुष्टुभा गृह्णाति वाग्वा अनुष्टुग्वाचैवैनाः सर्वया गृह्णाति चतुष्पदयर्चा गृह्णाति त्रिः सादयति सप्त सं पद्यन्ते सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाऽव रुन्धेऽस्मै वै लोकाय गार्हपत्य आ धीयतेऽमुष्मा आहवनीयो यद्गार्हपत्य उपसादयेदस्मिँल्लोके पशुमान्थ्स्याद्यदाहवनीयेऽमुष्मिँ- [१०] ल्लोके पशुमान्थ्स्यादुभयोरुप सादयत्युभयोरेवैनं लोकयोः पशुमन्तं करोति सर्वतः परि हरति रक्षसामपहत्या इन्द्राग्नियोर्भागधेयीः स्थेत्याह यथायजुरेवैतदाग्नीध्र उप वासयत्येतद्वै यज्ञस्याऽपराजितं यदाग्नीध्रं यदेव यज्ञस्याऽपराजितं तदेवैना उप वासयति यतः खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञग्ं रक्षाग्स्यव चरन्ति यद्बहन्तीनां गृह्णाति क्रियमाणमेव तद्यज्ञस्य शये रक्षसामनन्ववचाराय न ह्वेता ईलयन्त्या तृतीयसवनात्परि शेरे यज्ञस्य सन्तत्यै॥[११]

स्यादिन्द्रो गृह्णीयादस्त्वमुष्मिन्क्रियते षड्विग्ंशतिश्च॥6.4.2॥

ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युः स्याद्यः सोममुपावहरन्थ्सर्वाभ्यो देवताभ्य उपावहरेदिति हृदे त्वेत्याह मनुष्येभ्य एवैतेन करोति मनसे त्वेत्याह पितृभ्य एवैतेन करोति दिवे त्वा सूर्याय त्वेत्याह देवेभ्य एवैतेन करोत्येतावतीर्वै देवतास्ताभ्य एवैनग्ं सर्वाभ्य उपावहरति पुरा वाचः [१२] प्रवदितोः प्रातरनुवाकमुपाकरोति यावत्येव वाक्तामव रुन्धेऽपोऽग्रेऽभिव्याहरति यज्ञो वा आपो यज्ञमेवाऽभि वाचं वि सृजति सर्वाणि च्छन्दाग्स्यन्वाह पशवो वै छन्दाग्ंसि पशूनेवाऽव रुन्धे गायत्रिया तेजस्कामस्य परि दध्यात्त्रिष्टुभेन्द्रियकामस्य जगत्या पशुकामस्याऽनुष्टुभा प्रतिष्ठाकामस्य पङ्क्त्या यज्ञकामस्य विराजाऽन्नकामस्य शृणोत्वग्निः समिधा हवं

[१३] म इत्याह सवितृप्रसूत एव देवताभ्यो निवेद्याऽपोऽच्छैत्यप इष्य होतरित्याहेषितग्ं हि कर्म क्रियते मैत्रावरुणस्य चमसाध्वर्यवा द्रवेत्याह मित्रावरुणौ वा अपां नेतारौ ताभ्यामेवैना अच्छैति देवीरापो अपान्नपादित्याहाऽऽहुत्यैवैना निष्क्रीय गृह्णात्यथो हविष्कृतानामेवाऽभिघृतानां गृह्णाति [१४] कार्ष्मिरसीत्याह शमलमेवाऽऽसामप प्लावयति समुद्रस्य वोऽक्षित्या उन्नय इत्याह तस्मादद्यमानाः पीयमाना आपो न क्षीयन्ते योनिर्वै यज्ञस्य चात्वालं यज्ञो वसतीवरीर्होतृचमसं च मैत्रावरुणचमसं च सग्ग्ंस्पर्श्य वसतीवरीर्व्यानयति यज्ञस्य सयोनित्वायाथो स्वादेवैना योनेः प्र जनयत्यध्वर्योऽवेरपा ३ इत्याहोतेमनन्नमुरुतेमाः पश्येति वावैतदाह यद्यग्निष्टोमो जुहोति यद्युक्थ्यः परिधौ नि मार्ष्टि यद्यतिरात्रो यजुर्वदन्प्र पद्यते यज्ञक्रतूनां व्यावृत्त्यै॥[१५]

वाचो हवमभिघृतानाङ्गृह्णात्युत पञ्चविग्ंशतिश्च||**6.4.3**||

देवस्य त्वा सवितुः प्रसव इति ग्रावाणमा दत्ते प्रसूत्या अश्विनोर्बाहुभ्यामित्याहाऽश्विनौ हि देवानामध्वर्यू आस्तां पूष्णो हस्ताभ्यामित्याह यत्यै पशवो वै सोमो व्यान उपाग्ंशुसवनो यदुपाग्ंशुसवनमभि मिमीते व्यानमेव पशुषु दधातीन्द्राय त्वेन्द्राय त्वेति मिमीत इन्द्राय हि सोम आह्रियते पञ्च कृत्वो यजुषा मिमीते [१६] पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाऽव रुन्धे पञ्च कृत्वस्तूष्णीं दश सं पद्यन्ते दशाक्षरा विराडन्नंविराड्विराजैवाऽन्नाद्यमव रुन्धे श्वात्राः स्थ वृत्रतुर इत्याहैष वा अपाग्ं सोमपीथो य एवं वेद नाऽप्स्वार्तिमार्छति यत्ते सोम दिवि ज्योतिरित्याहैभ्य एवैनं [१७] लोकेभ्यस्सं भरति सोमो वै राजा

दिशोऽभ्यध्यायथ्स दिशोऽनु प्राऽविशत्प्रागपागुदगधरागित्याह दिग्भ्य एवैनग्ं सम्भरत्यथो दिश एवास्मा अव रुन्धेऽम्ब नि ष्वरेत्याह कामुका एनग्ग् स्त्रियो भवन्ति य एवं वेद यत्ते सोमादाभ्यं नाम जागृवीत्या- [१८] हैष वै सोमस्य सोमपीथो य एवं वेद न सौम्यामार्तिमार्छति घ्नन्ति वा एतथ्सोमं यदभिषुण्वन्त्यग्ंशूनप गृह्णाति त्रायत एवैनं प्राणा वा अग्ंशवः पशवः सोमोऽग्ंशून्पुनरपि सृजति प्राणानेव पशुषु दधाति द्वौद्वावपि सृजति तस्माद्द्वौद्वौ प्राणाः॥[१९]

यजुषा मिमीत एनञ्जागृवीति चतुश्चत्वारिग्ंशच्च॥6.4.4॥

प्राणो वा एष यदुपाग्ंशुर्यदुपाग्श्चग्रा ग्रहा गृह्यन्ते प्राणमेवाऽनु प्र यन्त्यरुणो ह स्माऽऽहौपवेशिः प्रातःसवन एवाऽहं यज्ञग्ं सग्ग् स्थापयामि तेन ततः सग्ग्स्थितेन चरामीत्यष्टौ कृतोऽग्रेऽभि षुणोत्यष्टाक्षरा गायत्री गायत्रं प्रातःसवनं प्रातःसवनमेव तेनाऽऽप्नोत्येकादश कृत्वो द्वितीयमेकादशाक्षरा त्रिष्टुप्त्रैष्टुभं माध्यंदिनग्ं [२०] सवनं माध्यंदिनमेव सवनं तेनाऽऽप्नोति द्वादश कृत्वस्तृतीयं द्वादशाक्षरा जगती जागतं तृतीयसवनं तृतीयसवनमेव तेनाऽऽप्नोत्येताग्ं ह वाव स यज्ञस्य सग्ग्स्थितिमुवाचाऽस्कन्दायाऽस्कन्नग्ं हि तद्यद्यज्ञस्य सग्ग्स्थितस्य स्कन्दत्यथो खल्वाहुर्गायत्री वाव प्रातःसवने नाऽतिवाद इत्यनतिवादुक एनम्भ्रातृव्यो भवति य एवं वेद तस्मादष्टावष्टौ [२१] कृत्वोऽभिषुत्यं ब्रह्मवादिनो वदन्ति पवित्रवन्तोऽन्ये ग्रहा गृह्यन्ते किं पवित्र उपाग्ंशुरिति वाक्पवित्र इति ब्रूयाद्वाचस्पतये पवस्व वाजिन्नित्याह वाचैवैनं पवयति वृष्णो अग्ंशुभ्यामित्याह वृष्णो ह्येतावग्ंशू यौ सोमस्य गभस्तिपूत

इत्याह गभस्तिना ह्येनं पवयति देवो देवानां पवित्रमसीत्याह देवो ह्येषः [२२] सन्देवानां पवित्रं येषां भागोऽसि तेभ्यस्त्वेत्याह येषाग् ह्येष भागस्तेभ्य एनं गृह्णाति स्वाङ्कृतोऽसीत्याह प्राणमेव स्वमकृत मधुमतीर्न इषस्कृधीत्याह सर्वमेवाऽस्मा इदग्ग् स्वदयति विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्य इत्याहोभयेष्वेव देवमनुष्येषु प्राणान्दधाति मनस्त्वा- [२३] ऽष्ट्विवत्याह मन एवाऽऋनुत उर्वन्तरिक्षमन्विहीत्याहाऽन्तरिक्षदेवत्यो हि प्राणः स्वाहा त्वा सुभवः सूर्यायेत्याह प्राणा वै स्वभवसो देवास्तेष्वेव परोऽक्षं जुहोति देवेभ्यस्त्वा मरीचिपेभ्य इत्याहाऽऽदित्यस्य वै रश्मयो देवा मरीचिपास्तेषां तद्भागधेयं तानेव तेन प्रीणाति यदि कामयेत वर्षुकः पर्जन्यः [२४] स्यादिति नीचा हस्तेन नि मृज्याद्वृष्टिमेव नि यच्छति यदि कामयेताऽवर्षुकः स्यादित्युत्तानेन नि मृज्याद्वृष्टिमेवोद्यच्छति यद्यभिचरेदमुं जह्यथ त्वा होष्यामीति ब्रूयादाहुतिमेवैनं प्रेप्सन् हन्ति यदि दूरे स्यादा तमितोस्तिष्ठेत्प्राणमेवाऽस्याऽनुगत्य हन्ति यद्यभिचरेदमुष्य [२५] त्वा प्राणे सादयामीति सादयेदसन्नो वै प्राणः प्राणमेवाऽस्य सादयति षड्भिरग्ंशुभिः पवयति षड्वा ऋतव ऋतुभिरेवैनं पवयति त्रिः पवयति त्रय इमे लोका एभिरेवैनं लोकैः पवयति ब्रह्मवादिनो वदन्ति कस्माथ्सत्यात्त्रयः पशूनाग्ं हस्तादाना इति यत्त्रिरुपाग्ंशुग्ं हस्तेन विगृह्णाति तस्मात्त्रयः पशूनाग्ं हस्तादानाः पुरुषो हस्ती मर्कटः॥[२६]

*माध्यन्दिनमष्टावष्टावेष मनस्त्वा पर्जन्योऽमुष्य पुरुषो द्वे च॥**6.4.5***॥

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा उपाग्ंशौ यज्ञग्ं सग्ग्स्थाप्यमपश्यन्तमुपाग्ंशौ समस्थापयन्तेऽसुरा वज्रमुद्यत्य देवानभ्यायन्त ते देवा

बिभ्यत इन्द्रमुपाऽधावन्तानिन्द्रोऽन्तर्यामेणाऽन्तरधत्त तदन्तर्यामस्याऽन्तर्यामत्वं यदन्तर्यामो गृह्यते भ्रातृव्यानेव तद्यजमानोऽन्तर्धत्तेऽन्तस्ते [२७] दधामि द्यावापृथिवी अन्तरुर्वन्तरिक्षमित्याहैभिरेव लोकैर्यजमानो भ्रातृव्यानन्तर्धत्ते ते देवा अमन्यन्तेन्द्रो वा इदमभूद्यद्वयग्ग् स्म इति तेऽब्रुवन्मघवन्ननु न आ भजेति सजोषा देवैरवरैः परैश्चेत्यब्रवीद्ये चैव देवाः परे ये चाऽवरे तानुभयानन्वाभजथ्सजोषा देवैरवरैः परैश्चेत्याह ये चैव देवाः परे ये चाऽवरे तानुभया- [२८] नन्वाभजथ्सजोषा देवैरवरैः परैश्चेत्याह ये चैव देवाः परे ये चाऽवरे तानुभयानन्वाभजत्यन्तर्यामे मघवन्मादयस्वेत्याह यज्ञादेव यजमानन्नाऽन्तरेत्युपयामगृहीतोऽसीत्याहाऽपानस्य धृत्यै यदुभावपवित्रौ गृह्येयातां प्राणमपानोऽनु न्यृच्छेत्प्रमायुकः स्यात्पवित्रवानन्तर्यामो गृह्यते [२९] प्राणापानयोर्विधृत्यै प्राणापानौ वा एतौ यदुपाग्श्चन्तर्यामौ व्यान उपाग्ंशुसवनो यङ्कामयेत प्रमायुकः स्यादित्यसग्ग्स्पृष्टौ तस्य सादयेद्व्यानेनैवाऽस्य प्राणापानौ वि च्छिनत्ति ताजक्प्र मीयते यङ्कामयेत सर्वमायुरियादिति सग्ग्स्पृष्टौ तस्य सादये द्व्यानेनैवाऽस्य प्राणापानौ सं तनोति सर्वमायुरेति॥[३०]

त उभयान्गृह्यते चतुश्चत्वारिग्ंशच्च॥6.4.6॥

वाग्वा एषा यदैन्द्रवायवो यदैन्द्रवायवाग्रा ग्रहा गृह्यन्ते वाचमेवाऽनु प्र यन्ति वायुं देवा अब्रुवन्थ्सोमग्ं राजानग्ं हनामेति सोऽब्रवीद्वरं वृणै मदग्रा एव वो ग्रहा गृह्यान्ता इति तस्मादैन्द्रवायवाग्रा ग्रहा गृह्यन्ते तमघ्नन्थ्सोऽपूयत्तं देवा नोपाऽधृष्णुवन्ते वायुमब्रुवन्निमन्नः स्वदये- [३१] ति सोऽब्रवीद्वरं वृणै मद्देवत्यान्येव वः पात्राण्युच्यान्ता इति तस्मान्नानादेवत्यानि सन्ति वायव्यान्युच्यन्ते तमेभ्यो

वायुरेवाऽस्वदयत्तस्माद्यत्पूयति तत्प्रवाते वि षजन्ति वायुर्हि तस्य पवयिता स्वदयिता तस्य विग्रहणन्नाऽविन्दन्साऽदितिरब्रवीद्वरं वृणा अथ मया वि गृह्णीध्वं मद्देवत्या एव वः सोमाः– [३२] सन्ना असन्नित्युपयामगृहीतोऽसीत्याहाऽदितिदेवत्यास्तेन यानि हि दारुमयाणि पात्राण्यस्यैतानि योनेः सम्भूतानि यानि मृन्मयानि साक्षात्तान्यस्यै तस्मादेवमाह वाग्वै पराच्यव्याकृताऽवदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्मादैन्द्रवायवः सह गृह्यते तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते तस्माथ्सकृदिन्द्राय मध्यतो गृह्यते द्विर्वायवे द्वौ हि स वरावव्रणीत॥[३३]

स्चदय सोमास्सहाऽष्टाविग्ंशतिश्च॥6.4.7॥

मित्रं देवा अब्रुवन्थ्सोमग्ं राजानग्ं हनामेति सोऽब्रवीन्नाऽहग्ं सर्वस्य वा अहं मित्रमस्मीति तमब्रुवन् हनामैवेति सोऽब्रवीद्वरं वृणै पयसैव मे सोमग्ग् श्रीणन्निति तस्मान्मैत्रावरुणं पयसा श्रीणन्ति तस्मात्पशवोऽपाऽक्रामन्मित्रः सन्क्रूरमकरिति क्रूरमिव खलु वा एषः [३४] करोति यः सोमेन यजते तस्मात्पशवोऽप क्रामन्ति यन्मैत्रावरुणं पयसा श्रीणाति पशुभिरेव तन्मित्रग्ं समर्धयति पशुभिर्यजमानं पुरा खलु वावैवं मित्रोऽवेदप मत्क्रूरं चक्रुषः पशवः क्रमिष्यन्तीति तस्मादेवमवृणीत वरुणं देवा अब्रुवन्त्वयाऽग्ंशभुवा सोमग्ं राजानग्ं हनामेति सोऽब्रवीद्वरं वृणै मह्यं चै– [३५] वैष मित्राय च सह गृह्याता इति तस्मान्मैत्रावरुणः सह गृह्यते तस्माद्राज्ञा राजानमग्ंशभुवा घ्नन्ति वैश्येन वैश्यग्ं शूद्रेण शुद्रन्न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा मित्रावरुणावब्रुवन्निदं नो वि वासयतमिति तावब्रूतां वरं

वृणावहा एक एवाऽऽवत्पूर्वो ग्रहो गृह्याता इति तस्मादैन्द्रवायवः पूर्वो मैत्रावरुणाद्गृह्यते प्राणापानौ ह्येतौ यदुपाग्श्चन्तर्यामौ मित्रोऽहरजनयद्वरुणो रात्रिं ततो वा इदं व्यौच्छद्यन्मैत्रावरुणो गृह्यते व्युष्ट्यै॥[३६]

एष चैन्द्रवायवो द्वाविग्ंशतिश्च॥6.4.8॥

यज्ञस्य शिरोऽच्छिद्यत ते देवा अश्विनावब्रुवन्भिषजौ वै स्थ इदं यज्ञस्य शिरः प्रति धत्तमिति तावब्रूतां वरं वृणावहै ग्रह एव नावत्रापि गृह्यतामिति ताभ्यामेतमाश्विनमगृह्णन्ततो वै तौ यज्ञस्य शिरः प्रत्यधतां यदाश्विनो गृह्यते यज्ञस्य निष्कृत्यै तौ देवा अब्रुवन्नपूतौ वा इमौ मनुष्यचरौ [३६] भिषजाविति तस्माद्ब्राह्मणेन भेषजं न कार्यमपूतो ह्ये २ षोऽमेध्यो यो भिषक्तौ बहिषवमानेन पवयित्वा ताभ्यामेतमाश्विनमगृह्णन्तस्माद्बहिष्पवमाने स्तुत आश्विनो गृह्यते तस्मादेवं विदुषा बहिष्पवमान उपसद्यः पवित्रं वै बहिष्पवमान आत्मानमेव पवयते तयोस्त्रेधा भैषज्यं वि न्यदधुरग्नौ तृतीयमप्सु तृतीयं ब्राह्मणे तृतीयन्तस्मादुदपात्र- [३८] मुपनिधाय ब्राह्मणं दक्षिणतो निषाद्य भेषजं कुर्याद्यावदेव भेषजं तेन करोति समर्धुकमस्य कृतम्भवति ब्रह्मवादिनो वदन्ति कस्माथ्सत्यादेकपात्रा द्विदेवत्या गृह्यन्ते द्विपात्रा हूयन्त इति यदेकपात्रा गृह्यन्ते तस्मादेकोऽन्तरतः प्राणो द्विपात्त्रा हूयन्ते तस्माद्द्वौद्वौ बहिष्टात्प्राणाः प्राणा वा एते यद्द्विदेवत्याः पशव इडा यदिडां पूर्वान्द्विदेवत्येभ्य उपह्वयेत [३९] पशुभिः प्राणानन्तर्दधीत प्रमायुकः स्याद्द्विदेवत्यान्भक्षयित्वेडामुप ह्वयते प्राणानेवाऽऽत्मन्धित्वा पशूनुप ह्वयते वाग्वा ऐन्द्रवायवश्चक्षुर्मैत्रावरुणः श्रोत्रमाश्विनः पुरस्तादैन्द्रवायवम्भक्षयति तस्मात्पुरस्ताद्वाचा

वदति पुरस्तान्मैत्रावरुणं तस्मात्पुरस्ताच्चक्षुषा पश्यति सर्वतः परिहारमाश्विनं तस्माथ्सर्वतः श्रोत्रेण शृणोति प्राणा वा एते यद्द्विदेवत्या [४०] अरिक्तानि पात्राणि सादयति तस्मादरिक्ता अन्तरतः प्राणा यतः खलु वै यज्ञस्य विततस्य न क्रियते तदनु यज्ञग्ं रक्षाग्ग्स्यव चरन्ति यदरिक्तानि पात्राणि सादयति क्रियमाणमेव तद्यज्ञस्य शये रक्षसामनन्ववचाराय दक्षिणस्य हविर्धानस्योत्तरस्यां वर्तन्याग्ं सादयति वाच्येव वाचं दधात्या तृतीयसवनात्परि शेरे यज्ञस्य सन्तत्यै॥[४१]

मनुष्यचरावुदपात्रमुपह्वयेत द्विदेवत्याष्ट्चत्वारिग्ंशच्च॥6.4.9॥

बृहस्पतिर्देवानां पुरोहित आसीच्छण्डामर्कावसुराणां ब्रह्मण्वन्तो देवा आसन्ब्रह्मण्वन्तोऽसुरास्तेऽ २ ऽन्योऽन्यन्नाऽशक्नुवन्नभिभवितुं ते देवाः शण्डामर्कावुपाऽमन्त्रयन्त तावब्रूतां वरं वृणावहै ग्रहावेव नावत्रापि गृह्येतामिति ताभ्यामेतौ शुक्रामन्थिनावगृह्णन्ततो देवा अभवन्पराऽसुरा यस्यैवं विदुषः शुक्रामन्थिनौ गृह्येते भवत्यात्मना परा- [४२] ऽस्य भ्रातृव्यो भवति तौ देवा अपनुद्याऽऽत्मन इन्द्रायाऽजुहवुरपनुत्तौ शण्डामर्कौ सहाऽमुनेति ब्रूयाद्यं द्विष्याद्यमेव द्वेष्टि तेनैनौ सहाऽप नुदते स प्रथमः सङ्कृतिर्विश्वकर्मेत्येवैनावात्मन इन्द्रायाऽजुहवुरिन्द्रो ह्येतानि रूपाणि करिक्रदचरदसौ वा आदित्यः शुक्रश्चन्द्रमा मन्थ्यपिगृह्य प्राञ्चौ नि- [४३] ष्क्रामतस्तस्मात्प्राञ्चौ यन्तौ न पश्यन्ति प्रत्यञ्चावावृत्य जुहुतस्मात्प्रत्यञ्चौ यन्तौ पश्यन्ति चक्षुषी वा एते यज्ञस्य यच्छुक्रामन्थिनौ नासिकोत्तरवेदिरभितः परिक्रम्य जुहुतस्तस्मादभितो नासिकां चक्षुषी तस्मान्नासिकया चक्षुषी विधृते सर्वतः परि क्रामतो रक्षसामपहत्यै देवा वै

याः प्राचीराहुतीरजुहवुर्ये पुरस्तादसुरा आसन्ताग्स्ताभिः प्रा- [४४] ऽणुदन्त याः प्रतीचीर्ये पश्चादसुरा आसन्ताग्स्ताभिरपानुदन्त प्राचीरन्या आहुतयो हूयन्ते प्रत्यञ्चौ शुक्रामन्थिनौ पश्चाच्चैव पुरस्ताच्च यजमानो भ्रातृव्यान्प्र णुदते तस्मात्पराचीः प्रजाः प्र वीयन्ते प्रतीचीर्जायन्ते शुक्रामन्थिनौ वा अनु प्रजाः प्र जायन्तेऽत्रीश्चाऽऽद्याश्च सुवीराः प्रजाः प्रजनयन्परीहि शुक्रः शुक्रशोचिषा [४५] सुप्रजाः प्रजाः प्रजनयन्परीहि मन्थी मन्थिशोचिषेत्याहैता वै सुवीरा या अत्रीरेताः सुप्रजा या आद्या य एवं वेदाऽत्र्यस्य प्रजा जायते नाऽऽद्या प्रजापतेरक्ष्यश्चयत्तत्पराऽपतत्तद्विकङ्कतं प्राऽविशत्तद्विकङ्कते नाऽरमत तद्यवं प्राऽविशत्तद्यवेऽरमत तद्यवस्य [४६] यवत्वं यद्वैकङ्कतं मन्थिपात्रम्भवति सक्तुभिः श्रीणाति प्रजापतेरेव तच्चक्षुः सम्भरति ब्रह्मवादिनो वदन्ति कस्माथ्सत्यान्मन्थिपात्रग्ं सदो नाश्नुत इत्यार्तपात्रग्ं हीति ब्रूयाद्यदश्नुवीताऽन्धोऽध्वर्युः स्यादार्तिमार्छेत्तस्मान्नाऽश्नुते॥[४७]

*आत्मना परा निष्प्र शुक्रशोचिषा यवस्य सप्तत्रिग्ंशच्च॥**6.4.10***॥

देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा आग्रयणाग्रान्ग्रहानपश्यन्तानगृह्णत ततो वै तेऽग्रं पर्यायन् यस्यैवं विदुष आग्रयणाग्रा ग्रहा गृह्यन्तेऽग्रमेव समानानां पर्येति रुग्णवत्यर्चा भ्रातृव्यवतो गृह्णीयाद्भ्रातृव्यस्यैव रुक्त्वाऽग्रग्ं समानानां पर्येति ये देवा दिव्येकादश स्थेत्याहै- [४८] तावतीर्वै देवतास्ताभ्य एवैनग्ं सर्वाभ्यो गृह्णात्येष ते योनिर्विश्वेभ्यस्त्वा देवेभ्य इत्याह वैश्वदेवो ह्येष देवतया वाग्वै देवेभ्योऽपाऽक्रामद्यज्ञायाऽतिष्ठमाना ते देवा वाच्यपक्रान्तायां तूष्णीं ग्रहानगृह्णत

साऽमन्यत वागन्तर्यन्ति वै मेति साऽऽग्रयणं प्रत्याऽगच्छत्तदाग्रयणस्याऽऽग्रयणत्व-
[४९] न्तस्मादाग्रयणे वाग्वि सृज्यते यत्तूष्णीं पूर्वे ग्रहा गृह्यन्ते यथा थ्सारीयति म
आख इयति नाऽप राथ्स्यामीत्युपावसृजत्येवमेव तदध्वर्युराग्रयणं गृहीत्वा यज्ञमारभ्य
वाचं वि सृजते त्रिर्हिं करोत्युद्गातृनेव तद्वृणीते प्रजापतिर्वा एष यदाग्रयणो
यदाग्रयणं गृहीत्वा हिं करोति प्रजापतिरेव [५०] तत्प्रजा अभि जिघ्रति तस्माद्वथ्सं
जातं गौरभि जिघ्रत्यात्मा वा एष यज्ञस्य यदाग्रयणः सवनेसवनेऽभि गृह्णात्यात्मन्नेव
यज्ञग्ं सं तनोत्युपरिष्टादा नयति रेत एव तद्दधात्यधस्तादुप गृह्णाति प्र जनयत्येव
तद्ब्रह्मवादिनो वदन्ति कस्माथ्सत्याद्गायत्री कनिष्ठा छन्दसाग्ं सती सर्वाणि सवनानि
वहतीत्येष वै गायत्रियै वथ्सो यदाग्रयणस्तमेव तदभिनिवर्तग्ं सर्वाणि सवनानि
वहति तस्माद्वथ्समपाकृतं गौरभि नि वर्तते॥[५१]

*आहऽऽग्रयणत्वं प्रजापतिरेति विग्ंशतिश्च॥**6.4.11***॥

यज्ञेन ता उपयड्भिर्देवा वै यज्ञमाग्नीध्रे ब्रह्मवादिनस्स त्वै देवस्य ग्रावाणं प्राणो वा उपाग्ंश्चग्रा देवा वा
*उपाग्ंशौ वाग्वै मित्रं यज्ञस्य बृहस्पतिर्देवा वा आग्रयणाग्रानेकादश॥**11***॥

यज्ञेन लोके पशुमान्थ्स्याथ्सवनं माध्यन्दिनं वाग्वा अरिक्तानि तत्प्रजा एकपञ्चाशत्॥५१॥

यज्ञेन नि वर्तते॥

॥हरिः ओम्॥

॥श्री कृष्णार्पणमस्तु॥

॥इति षष्ठ काण्डे चतुर्थः प्रश्नः॥